विशेषगुणानां हि कारणगुणपूर्व्वकता दृष्टा तथाच शरी-
रकारणेषु यदि ज्ञानं स्यात्तदा शरीरेऽपि सम्भाव्येत नचैवम्।
नन्वस्तु शरीरकारणेष्वपि चैतन्यमिति चेन्न ऐकमत्याभाव-
प्रसङ्गात् न हि बहूनाञ्चेतनानामैकमत्यं दृष्टम्, करावच्छेदे-
नानुभूतस्य करच्छेदेऽस्मरणप्रसङ्गात् यतः "नान्यदृष्टं स्मर-
त्यन्यः" इति। किञ्च शरीरनाशे तत्कृतहिंसादिफलानुपभो-
गप्रसङ्गात् नहि चैत्रेण कृतस्य पापस्य फलं मैत्रो भुङ्क्ते
ततश्च कृतहानिरकृताभ्यागमश्च स्यात् ३। ननु शरीरकारणेषु
सूक्ष्ममात्रया ज्ञानमस्ति शरीरे तु स्फुटमतो नाऽकारण-
गुणपूर्व्वकता नचैकमत्यानुपपत्तिरित्याशङ्क्याह। यदि हि
शरीरमूलकारणेषु परमाणुषु चैतन्यं स्यात् तदा तदा-
रब्धेषु कार्य्येषु घटादिष्वपि स्यात् किञ्च पार्थिवविशेषगु-
णानाम् सर्व्वपार्थिववृत्तितान्याप्तेः कार्य्येष्वपि घटा-
दिषु चैतन्यं स्यान्न च तत्र चैतन्यमुपलभ्यते इत्यर्थः ४।
ननु घटादावपि सूक्ष्ममात्रया चैतन्यमस्त्येवेत्याशङ्क्याह।
सर्व्वैः प्रमाणैरज्ञानात् कुम्भादौ न चैतन्यमित्यर्थः।
सर्व्वप्रमाणागोचरस्याप्यभ्युपगमे शशविषाणादेरप्यभ्युपगम-
प्रसङ्गः न हि घटादौ चैतन्यं केनापि प्रमाणेन ज्ञायत
इति ५। ननु श्रोत्रादिभिः करणैरधिष्ठाताऽनुमीयते इत्यु-
क्तं तदयुक्तं नहि श्रोत्रादिभिरात्मनस्तादात्म्यं तदुत्प-
त्तिर्व्वा न च ताभ्यामन्तरेणाऽविनाभावसिद्धिः नचावि-
नाभावमन्तरेणाऽनुमितिरित्यत आह। हेतुः साध्यादन्य
एव भवति न तु साध्यात्मा साध्याविशेषप्रसङ्गात् तस्मा-
त्तादात्म्यघटितो हेतुरहेतुरनपदेश इत्यर्थः ६। ननु श्रोत्रा-
दिभिरिन्द्रियैरात्मनो यथा न तादात्म्यं तथा तदुत्प-
त्तिरपि नास्ति नहि वह्नेर्धूम इव आत्मनः श्रोत्रादि-
करणमुत्पद्यते इत्यत आह। हि यतः कार्य्यं धूमादि
यथा रासभादेरर्थान्तरम् तथा कारणाद्वह्न्यादेरप्यर्थान्तरमेव
तथा चार्थान्तरत्वाविशेषात् धूमो रासभं न गमयति किन्तु
वह्निमेव गमयतीत्यत्र स्वभावविशेष एव नियामकः स
च स्वभावो यदि कार्य्यादन्यस्यापि भवति तदा सोऽप्यपदे-
शोभवत्येव तथा च कार्य्यमविवक्षितस्वभावभेदम् अनपदेशः,
तथा च तादात्म्यतदुत्पत्ती एवाऽविनाभावः तयोरेवाविना-
भावपर्य्यवसानम् ताभ्यां समानोपायौ वा तदुभयमात्र
ग्रहाधीनग्रहौ वेति स्वशिष्यव्यामहोनाय परिभाषामा-
त्रमिति भावः" ७॥ उपस्क०। अनतिदूरे च तत्रैव
"आत्मेन्द्रियार्थसन्निकर्षाद्यन्निष्पद्यते तदन्यत्" १८ सू०।
"ज्ञानमात्मन्युभयथा लिङ्गम्, ज्ञानं क्वचिदाश्रितं कार्य्य-
त्वाद्रूपादिवदिति वा, प्रत्यभिज्ञारूपतया वा योऽहमद्राक्षं
सोऽहं स्पृशामीति, तत्र ज्ञानगतं कार्य्यत्वं नासिद्धं
यन्निष्पद्यत इत्यभिधानात्, न विरुद्धं सामान्यतोदृष्टेऽत्र
विरोधाभावात्। नचानैकान्तिकम्, तत एव, तथा च स्वगत-
कार्य्यत्वगुणत्वद्वारा सामान्यतोदृष्टेन ज्ञानमेवात्मनि लिङ्गम्,
प्रत्यभिज्ञानन्तु भिन्नकर्त्तृकेभ्योव्यावर्त्तमानमेककर्त्तृकतायां
पर्य्यवस्यति। न च बुद्धिचैतन्येऽपि कार्य्यकारणभावनिबन्धन-
मेव प्रतिसन्धानम्, शिष्यगुरुबुद्ध्योरपि प्रतिसन्धानप्रसङ्गात्।
उपादानोपादेयभावस्तत्र नास्ति स च प्रतिसन्धानप्रयोजक
इति चेदुपादानत्वस्य द्रव्यधर्म्मतया बुद्धावसम्भवात्, सम्भ-
वे वा बुद्धीनां क्षणिकतया पूर्व्वानुभूतप्रतिसन्धानानुप-
पत्तेः, न हि पूर्व्वबुद्ध्या उत्तरासु बुद्धिषु कश्चित् संस्कार
आधीयते, स्थिरस्य तस्य त्वयाऽनभ्युपगमात्, क्षणिकबुद्धि-
धारारूपस्य च कालान्तरस्मृतौ प्रतिसन्धाने वाऽसामर्थ्यात्।
आलयविज्ञानसन्तानः प्रवृत्तिविज्ञानसन्तानादन्य एव
स्मर्त्ता च प्रतिसन्धाता चेति चेत् स यदि स्थिरः तदा
सिद्धं नः समीहितम्, क्षणिकबुद्धिधारारूपश्चेत् तदा
पूर्व्वदोषानतिवृत्तेः, न हि तत्रापि स्थिरः कश्चित्
संस्कारः। किञ्च प्रवृत्तिविज्ञानातिरिक्ते तत्र प्रमाणा-
भावः। अहमिति बुद्धिधारैव प्रमाणमिति चेत् भवतु
तत्र प्रवृत्तिविज्ञानान्यालयविज्ञानमेव चेदुपादत्ते तदा
प्रवृत्तिविज्ञानानामुपादानताविरहे निमित्तताऽपि न स्यात्
उपादानताव्याप्तत्वान्निमित्ततायाः, माऽस्तु निमित्तताऽ-
पीति चेत् तर्हि सत्त्वमपि गतम्, अर्थक्रियाकारित्वस्य
सत्त्वलक्षणत्वात् प्रवृत्तिसन्तानालयविज्ञानसन्तानाभ्यां स-
म्भूय सन्तानद्वयमुपादीयत इति चेत् तर्हि किमपराद्धम-
वयविसंयोगादिभिः, व्यासज्यवृत्तितायास्त्वयाप्यभ्युपगमात्।
तस्माज्ज्ञानेनाश्रयतयाऽनुमितमात्मानं प्रतिसन्धानं स्थिर-
त्वेन साधयतीति न किञ्चिदनुपपन्नम्। यद्वा नित्या
बुद्धिर्नात्मानं कारणत्वेन गमयितुमर्हतीति साङ्ख्यमतनि-
रासाय सूत्रमिदमुपतिष्ठते "आत्मेन्द्रियार्थसन्निकर्षाद् य-
न्निष्पद्यते तदन्यत्" बुद्धितत्त्वं यत्त्वयोच्यते तज्ज्ञानमेव,
बुद्धिरुपलब्धिर्ज्ञानमिति हि पर्य्यायाभिधानं, तच्चात्मादि-
सन्निकर्षादुत्पन्नम्। अन्यदेव त्वदभ्युपगतादन्तःकरणादि-
त्यर्थः तथाच भवति तत् आत्मनोलिङ्गमिति भावः" १८।
"प्रवृत्तिनिवृत्ती च प्रत्यगात्मनि दृष्टं परत्र लिङ्गम्" १९।
"आत्मन्यनुमानमभिधाय इदानीं परात्मानुमानमाह। प्रत्य-
गात्मनीति स्वात्मनीत्यर्थः, इच्छाद्वेषजनिते प्रवृत्तिनिवृत्ती